# रक्षणीया प्रकृतिः

प्रकृतिः अस्माकं पालिका, किन्तु इदानीं सर्वत्रैव प्रकृतिप्रदूषणं दृश्यते। अनवरतेन वृक्षकर्तनेन वनानां विनाशः जातः। औद्योगिककेन्द्राणाम् अवशिष्टाः अवकराः जलप्रदूषणं कुर्वन्ति। विषयुक्तेन धूमाधिक्येन वायुरतीव प्रदूषितः। अतः 'अस्माभिः पर्यावरणं रक्षणीयम्' इत्यभिलक्ष्य एषः पाठः प्रस्तुतोऽस्ति।

*(ग्रीष्मे ऋतौ सूर्यस्य प्रचण्डोष्मणा विद्युदभावे पीड़ितः किशोरः गृहात् निष्क्रम्य)*

**किशोरः** - प्रचण्डोष्मणा पीड़ितोऽस्मि। प्रचण्डातपः सूर्यस्य अन्यतश्च विद्युदभावः। शरीरात् न केवलं स्वेदविन्दवः अपितु स्वेदधाराः प्रस्रवन्ति। अहो, तरुणः अपि इत एव आगच्छति।

**तरुणः** - (आगत्य) वयस्य ! प्रचण्डसूर्यतापेन अतिव्यथितोऽहम्।

**किशोरः** - ममापि एतादृशी दशा। तर्हि आगच्छ, शीतलस्थानं प्रति गच्छावः।

*(उभौ नदीतटं प्रति गच्छतः, मार्गे तडागमेकं दृष्ट्वा)*

**तरुणः** - वयस्य ! पश्यत्वेतस्मिन् सरोवरे बहूनि कमलानि विकसितानि। अन्यतश्च कमलानि निमीलितानि। एतत् कथं सम्भवति ?

**किशोरः** - मित्र ! कमलपुष्पाणि विविधानि भवन्ति। तेषु यानि पुष्पाणि सूर्योदयकाले विकसन्ति सूर्यास्तकाले निमीलन्ति च तानि पद्मानि। यानि च स्वविकासाय चन्द्रप्रकाशमपेक्षन्ते तानि कुमुदानि।

*(वार्तालापं कुर्वन्तौ तौ एकस्य वृक्षच्छायां प्राप्य तिष्ठतः)*

**तरुणः** - किशोर ! पश्यतु, वृक्षाः स्वयं तु आतपं सहन्ते किन्तु अस्मभ्यं शीतलछायां प्रयच्छन्ति। फलानि अपि यच्छन्ति। एवं वृक्षाः परोपकारिणः एव।

**किशोरः** - सत्यम् , परं मनुष्याः स्वार्थाय निरन्तरं वृक्षाणां कर्तनं कृत्वा तान् समूलं नाशयन्ति। यदि एवं विधः स्यात् ततो शीघ्रमेव अस्माकं सस्यश्यामला विश्वम्भराधरा मरुभूमिः भविष्यति।

**तरुणः** - आम्, सत्यम्, एतेन कारणेनैव वातावरणमत्युष्णं जातम्।

*(उभौ नदीतटं प्राप्तौ)*

**किशोरः** - वयस्य ! नदीजलं पश्य। कियन्मधुरं शीतलं च। अत्रागत्य ममोष्णतायाः शमनमभवत्। शीतलमन्दसमीरेण च मे मनः प्रसीदति।

*(उभौ जले निमज्जतः)*

**तरुणः** - हा ! हा ! अत्यानन्दप्रदमिदं जलम्।

**किशोरः** - आम्, वयस्य ! चिन्तयामि यत् यावद् ग्रीष्ममत्रैव वसानि।



कीदृशं शोभनं दृश्यम् । मीना: जले क्रीडन्ति । कच्छपा: जनसम्मर्दात् भीता: जले प्रविशन्ति । वृक्षेषु खगा: मधुरं कलरवं कुर्वन्ति । मण्डूका: इतस्तत: कूर्दन्ति जले प्लवन्ते च ।

**तरुण:** - नदीवृक्षादयस्तु अस्माकं कृते प्रकृते: उपहारा: । किन्तु अस्माभि: एते कीदृशी दशां प्रापिता: ।

**किशोर:** - आम्, साम्प्रतं पर्यावरणमस्माभिरेव दूषितं कृतम् । वाहनधूमाधिक्येन वायुप्रदूषणमभवत् । नदीतटीयात् औद्यौगिककेन्द्रात् नि:सृता: अवशिष्टा: पदार्था: अनवरतं जले मिश्रिता: । एतै: जलं प्रदूषितं जातम् । रासायनिकै: अवकरै: कच्छपा: मकरा: मत्स्यादयश्च सर्वे जलचरा: सन्त्रस्ता: सन्ति ।

**तरुण:** - आम्, तथापि प्रकृति: एतावतीं व्यथां वहन्ती अपि परेषाम् उपकारमेव करोति । वृक्षा: समागतेभ्य: फलानि अर्पयन्ति । एषा सरिता अपि स्वशीतलेन जलेन अस्मान् आनन्दयति ।

**किशोर:** - अहम् अनुभवामि यत् केनापि प्रकारेण अस्माभि: वृक्षाणां कर्तनं, जलवाय्वादिप्रदूषणञ्च अवरोधनीयम् । अस्माकं सङ्कल्प: स्यात् यत् सर्वथा प्रकृति: रक्षणीया ।

**तरुण:** - शोभनम्, वयं सर्वे मिलित्वा एतदर्थं जनजागरणाय यत्नं करिष्याम: ।

*(उभौ गच्छत:)*

## शब्दार्थ:

अवकरा: - दूषितधूलकणा: । ऊष्मणा - तापेन । व्यथित: - दु:खित: । तडाग: - सरोवर: । विश्वम्भरा - विश्वं भरति इति (पृथ्वी) । सहन्ते - सहनं कुर्वन्ति । जनसम्मर्दात् - जनानां समूहात् । प्लवन्ते - तरन्ति । वहन्ती - धारयन्ती ।

## अभ्यास:

1. **एकपदेन उत्तरत -**

(क) किशोर: केन पीडित: ?

(ख) तरुण: केन व्यथित: ?

(ग) सूर्योदयकाले कानि विकसन्ति ?

(घ) वृक्षा: अस्मभ्यं किं प्रयच्छन्ति ?

(ङ) साम्प्रतं पर्यावरणं कीदृशं जातम् ?

2. **एकवाक्येन उत्तरत -**

(क) रासायनिकै: अवकरै: के सन्त्रस्ता: सन्ति ?

(ख) कुमुदानि कदा विकसन्ति ?

(ग) वृक्षाणां विनाशात् वातावरणं कीदृशं जातम् ?

(घ) नदीजलं कीदृशं जातम्?

(ङ) किशोर: प्रकृतिं दृष्ट्वा किम् अनुभवति ?

3. **त्रिचतुर्भिर्वाक्यैः उत्तरत -**

(क) विश्वम्भरा धरा कदा मरुभूमिः भविष्यति ?

(ख) किशोरेण नदीतटे किं किं दृष्टम् ?

(ग) पर्यावरणं कथं प्रदूषितं जातम् ?

(घ) अस्माकं कीदृशः सङ्कल्पः स्यात् ?

4. **रिक्तस्थानानि पूरयत -**

(क) वयं जनजागरणाय .............................. करिष्यामः।

(ख) वृक्षाः................................ प्रयच्छन्ति।

(ग) कच्छपाः ............................... भीताः जले प्रविशन्ति।

(घ) औद्योगिककेन्द्रात् निःसृताः ................................ अनवरतं जले मिश्रिताः।

(ङ) मनुष्याः वृक्षाणां .............................. कृत्वा तान् समूलं नाशयन्ति।

5. **युग्ममेलनं कुरुत -**

| | 'अ' | 'आ' |
|---|---|---|
| (क) | पद्मानि | कलरवं कुर्वन्ति |
| (ख) | वृक्षाः | सूर्योदयकाले विकसन्ति |
| (ग) | खगाः | प्रदूषणमभवत् |
| (घ) | कुमुदानि | परोपकारिणः |
| (ङ) | वाहनधूमाधिक्येन | चन्द्रप्रकाशमपेक्षन्ते |

6. **अधोलिखितपदानां विभक्तिं वचनं च लिखत -**

(क) शरीरात्    (ख) सूर्यतापेन

(ग) सरोवरे    (घ) परोपकारिणः

(ङ) समागतेभ्यः    (च) वृक्षाणाम्

(छ) जनजागरणाय

7. **अधोलिखितक्रियापदानां धातुं लकारं पुरुषं वचनं च लिखत -**

| क्रियापदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| (क) गच्छावः | | | | |
| (ख) पश्यतु | | | | |
| (ग) यच्छन्ति | | | | |
| (घ) भविष्यति | | | | |
| (ङ) स्यात् | | | | |
| (च) अभवत् | | | | |
| (छ) प्लवन्ते | | | | |
| (ज) करिष्यामः | | | | |
| (झ) वसानि | | | | |

**8. अधोलिखितक्रियापदानां प्रकृतिप्रत्ययौ पृथक् कुरुत -**

(क) आगत्य

(ख) जातम्

(ग) कृत्वा

(घ) निष्क्रम्य

(ङ) दृष्ट्वा

(च) रक्षणीया

(छ) मिलित्वा

**9. नामोल्लेखपूर्वकं सन्धिविच्छेदं कुरुत -**

(क) विद्युदभावे

(ख) सूर्योदयकाले

(ग) अत्रागत्य

(घ) इतस्ततः

(ङ) वृक्षादयस्तु

(च) पश्यत्वेतस्मिन्

(छ) अत्युष्णम्

**10. नामोल्लेखपूर्वकं समासविग्रहं कुरुत -**

(क) परोपकारिणः

(ख) समूलम्

(ग) विश्वम्भरा

(घ) मरुभूमिः

(ङ) प्रचण्डसूर्यतापेन

(च) स्वविकासाय

**योग्यताविस्तारः -**

- पर्यावरणप्रदूषणमधिकृत्य एकं निबन्धं लिखत।
- अस्य पाठस्य मञ्चनं विद्यालये कुरुत।
- 'पर्यावरणस्य रक्षणं कथं करणीयम्' इत्यस्मिन् विषये जनैः सह वार्ता कर्त्तव्या।